एतेष्वन्यतमः सत्त्वशीलाद्यैस्समलङ्कृतः ।
विष्णुचित्ताभिधो विष्णुकुलदीप इवोत्थितः ॥ ४॥

आसीद्भगवतो धन्विपुरेशस्य पदाम्बुजे ।
कुर्वन् हि तुलसीपत्रमञ्जर्याद्यैः समर्चनाम् ॥ ५॥

तुलसीभूमिखननवेळायां पेटिकागता ।
एकदा बालिका लब्धा विष्णुभक्तशिखामणेः ॥ ६॥

दिने दिने स्वच्छपक्षकलेव शशिनः शुभा ।
ववृधे यौवनं चापि तस्याः प्रादुरभूद्वयः ॥ ७॥

सर्वदा भगवन्तं तं रङ्गनाथाह्वयं प्रभुम् ।
स्वस्य भर्तारमाचिन्त्य तद्व्यग्रा समभूत्सदा ॥ ८॥

अनावृष्टिरभूद्वृन्दावने कृष्णापचारतः ।
पूर्वमेतत्समालोच्य कर्तुं कात्यायनीव्रतम् ॥ ९॥

ऐहन्त हन्त ता गोप्यः साध्यं त्रिंशद्दिनैः शुभम् ।
प्रार्थयन्ते स्म तं कृष्णं व्रतोपकरणं प्रति ॥ १०॥

अङ्गीकृत्य तदीयां तां प्रार्थनां सफलां व्यधात् ।
कृष्णः कमलपत्राक्षो भक्तानामभयप्रदः ॥ ११॥

ततस्ताः सङ्गताः स्वासु नियमं पर्यकल्पयन् ।
या पूर्वं प्रातरुत्तिष्ठेत्प्रबोधयतु सापराः ॥ १२॥

इत्थं विधाय नियमं तथैव प्रातरुत्थिताः ।
यमुनायां सुखं स्नात्वा चक्रिरे व्रतमुत्तमम् ॥ १३॥

पूर्णिमायां मार्गशीर्षमासि पुण्यदिने शुभे ।
आख्यायिकामिमां कृत्स्नां स्मरन्ती मनसा सती ॥ १४॥

गोपिकाभिः कृतं सर्वं कार्यजातं त्वमन्यत ।
स्वेनैव क्रियमाणं सा गोदा सर्वाङ्गसुन्दरी ॥ १५॥

मत्वा तथैव सा गोदा प्रोवाचेमां कथां स्मृताम् ।
त्रिंशता रसपूर्णाभिः दिव्यैर्द्रमिडसूक्तिभिः ॥ १६॥

अथ तिरुप्पावै श्लोकाः ।

या स्वयं भट्टनाथस्य सीतेव मिथिलेशितुः ।

ध्यानावस्थिततद्गतेन मनसा सङ्कीर्तयद्भिर्हरिं
    शब्दानुच्चरितान् महाजनगणैः श्रुत्वापि नोद्बुध्यसे ॥ ६॥

अन्यां काञ्चिदुत्थापयति - कीचु कीचु - इति ।
भ्रान्ते खञ्जनसङ्गजातनिनदान् त्वं कीचुकीचीत्यमून्
    गोप्यः सुन्दरकेशपाशभरिता माङ्गल्यमालावृताः ।
यन्मथ्नन्ति दधीह तेन जनितान् शब्दांश्च यत्केशवं
    ब्रूमस्तद्भवती न किं निशमयत्युत्तिष्ठ बाले शुभे ॥ ७॥

एका अपरां प्रबोधयति - कीऴ्वानम् - इति ।
दृष्ट्वा प्राच्यां प्रकाशं तदनु यदुवरैर्मुच्यमाना महिष्यः
    धावन्त्येकत्र तुष्टाः तृणचरणधिया नैव वर्तामहेऽत्र ।
इत्येवं बद्धकोपाः ज्वलदनलसमाः स्थापयित्वैव गोपीः
    प्राप्ताः स्मस्त्वां हि नेतुं बकमुखशमनं कृष्णमुच्चैः स्तुवन्त्यः ॥ ८॥

गोपिकास्वन्यतमा अपरां गोपिकां उद्बोधयति - तूमणि माटत्तु - इति ।
पर्यङ्के बहुरत्नदीपभरिते धूपैस्तथा व्यापृते
    निद्रासि ह्यबले कवाटयुगलं त्वं क्षिप्रमुद्घाटय ।
मूका किं बधिरालसा तव सुता स्वापाभिचारं गता
    किं वा कीर्तय मायिनं हरिमिमां क्षिप्रं त्वमुत्थापय ॥ ९॥

गोपिकामेकां अपरा प्रबोधयति - नोट्रु स्वर्गम् - इति ।
अस्माकं पटहप्रदेन तुलसीयुञ्मौलिना शार्ङ्गिणा
    ध्वस्तो रावणसोदरः स विजितो निद्रापरीक्षाविधौ ।
चिह्नं स्वीयपराजयस्य महतीं निद्रामदात्किं नु ते
    येन त्वं स्वपिषीदृशं बहुविधं सम्बोध्यमाना मुहुः ॥ १०॥

गाढनिद्रासुखमनुभवन्तीं अन्यां गोपीं उत्थापयति - कट्रुक्करवै - इति ।
सम्पन्नस्य च शत्रुनाशनविधौ दीक्षाजुषः पुत्रिके
    वल्मीकाग्रफणाधरप्रविलसन्मध्ये मयूरीनिभे ।
सख्यस्ते समुपागता जलधरच्छायं भजन्त्यो हरिं
    नोत्तिष्ठस्यपि मूकभावसहिता किं मन्यसे निद्रया ॥ ११॥

अन्यां काञ्चित् गोपिकां उत्थापयति - कनैत्तिळम् - इति ।
बद्धैर्वत्सपरायणैः सुमहिषीवृन्दैः पयः क्षारणा-
    दासिक्ताङ्गणभुमिसद्गृहपतेर्गोपेश्वरस्य स्वसः ।

गेहद्वारसमागतैर्हिमजलासिक्तस्वशीर्षैः सखी-
वृन्दैः संस्तुतरावणारिविभवं श्रुत्वापि नोद्बुध्यसे ॥ १२॥

एकां गोपिकां प्रबोधयति - पुळ्ळिन् वाय् - इति ।

विष्णुं घोरबकास्यदारकममुं रक्षःशिरश्छेदिनं
गायन्त्यः प्रतिपेदिरे व्रतभुवं सर्वाश्च गोपाङ्गनाः ।
शुक्रः प्रादुरभूद्बृहस्पतिरगादस्तं द्विजाश्चोत्थिताः
बाले त्वीदृशकाल एव शयिता स्नानं ह्यकृत्वा शुभे ॥ १३॥

प्रभातलक्षणं वर्णयन्ती काञ्चिद्गोपिकामुद्बोधयति - उङ्गळ् पुळक्कडै - इति ।

गेहारामगवापिकाजलगतं रक्तोत्पलं पुष्पितं
भ्रान्ते सङ्कुचिताऽभवत्कुमुदिनी ध्मायन्ति शङ्खं जनाः ।
श्वः प्रातः प्रथमोत्थिता ननु सखीरुद्बोधयिष्येऽह मि-
त्युक्तिः किं तव नैव लज्जयति तत्प्रोत्थाय कृष्णं भज ॥ १४॥

अपरां गोपिकामुत्थापयति - एल्ले इळङ्किळिये - इति ।

अद्यापि स्वपिषीह बालशुकिसख्यद्य प्रबुद्धास्म्यहं
जानेऽहं तव वाक्यकौशलमहं यूयं तथा द्रक्ष्यथ ।
किं सर्वाः समुपागमन् ? ननु तथा सङ्ख्याय जानीहि तत्
त्वं तं मायिनमुग्रशत्रुशमनं कृष्णं सखायं स्मर ॥ १५॥

एतावता सर्वाः उद्बुध्य सम्प्रति नन्दगोपस्य गृहद्वारमागतवत्यः
प्रथमं दौवारिकं याचन्ते - नायकनाय् निन्ड्र - इति ।

श्रीमद्गोपजनेशितुर्गृहपरित्रातस्तथोच्चध्वज-
प्रालम्बोज्ज्वलतोरणप्रगुणितद्वारस्थ दौवारिक ।
कृष्णः प्रागवदद्व्रतोपकरणं दास्यामि युष्मभ्यमि-
त्याप्ताः सेवितुमेव तं मणिमयं तस्मात्कवाटं नुद ॥ १६॥

नन्दादीनुद्बोधयन्ति - अम्बरमे तण्णीरे - इति ।

स्वामिन् दानपरायण प्रभुवर प्रोत्तिष्ठ नन्दप्रभो
स्वामिन्युत्तमवंशजे शुभगुणे निद्रां यशोदे त्यज ।
व्याप्य व्योम पदत्रयेण तु जगन्मातः प्रबुध्यस्व हे
विष्णो त्वं बलभद्र कृष्णसहितश्चोत्तिष्ठ कृष्णप्रिय ॥ १७॥

पुरुषकारभूतां नीलामुद्बोधयन्ति - उन्दु मदकळिट्ट्रन् - इति ।

नीले वासितचारुकेशनिचये हे नन्दगोपस्नुषे

कूजन्त्यत्र च कुक्कुटा अपि कुहूकण्ठा लतामण्टपे ।
अस्मत्कीर्तितकृष्णनामविभवं भक्त्या स्वयं शृण्वती
भूषाशिञ्जितमञ्जुपाणिकमलेनोद्घाटयस्वार्गलम् ॥ १८॥

नीलादेवीं पुरस्कृत्य कृष्णपरमात्मानमुत्थापयन्ति - कुत्तु विळक्केरिय - इति ।
पर्यङ्के बहुदीपराजिलसिते कान्ताकुचाग्रस्थली-
विन्यस्तात्मभुजान्तराल भगवन् वाचं न दत्से हि नः ।
देवि त्वं न किलेच्छसि स्वशयनात्कान्तं कदाप्युत्थितं
त्वं चेन्न क्षणविप्रयोगसहना तत्त्वं न तन्नो दया ॥ १९॥

श्रियःपतिं कृष्णपरमात्मानं गोपिकाः प्रबोधयन्ति - मुप्पत्तुमूवर् - इति ।
त्रिंशत्कोटिदिवौकसामपि पुरो गत्वा तदार्तिच्छिदा-
कारिन्नाश्रितवत्सलारिशमनोत्तिष्ठ स्वयं निर्मल ।
नीले विद्रुमरक्तवर्णवदने कुम्भस्तनि त्वं हि नः
कृष्णं चान्यदपेक्षितं च करणं दत्वा व्रतं कारय ॥ २०॥

कृष्णपरमात्मानं गोपिकाः प्रबोधयन्ति - एट्ट्र कलङ्गळ् - इति ।
आपूर्य प्रसृतान् घटान् बहुपयोधारा बहिर्मुञ्चतः
स्वामी धेनुगणस्य योऽतिमहतो गोपस्य तस्यात्मज ।
दीनास्त्यक्तपराक्रमारिसदृशास्त्वत्पादपद्मान्तिकं
प्राप्ताः स्मः श्रितपालनोद्यत जगद्दीप प्रबुध्यस्व भो ॥ २१॥

एतावता भगवन्तमुत्थाप्य सम्प्रति तत्कटाक्षान् प्रार्थयन्ते -आङ्गण् मा ञालत्तु-इति
।
नष्टाहङ्कृतिशत्रुसङ्घवदिहागत्य स्थितानामुपर्य-
स्माकं न पतेयुरब्ज रुचयः किं ते कटाक्षाः शनैः ।
अक्षिभ्यामुदितार्कचन्द्रसदृशत्विङ्भ्यां मनाक् चेद्भवा-
नस्मान् पश्यति नष्टपापनिचयाः स्याम प्रहृष्टा वयम् ॥ २२॥

गोपाङ्गनाः कृष्णपरमात्माने स्वागमनं निवेदयन्ति - मारिमलै मुळैञ्चिल् - इति ।
क्षोणीभृद्वरकन्दरोदरशयः सिंहः प्रबुद्धो यथा
दृष्ट्वोग्रं परिधूय केसरचयं चाञ्चेद्गभीरां गतिम् ।
आगत्यैवमधिष्ठितः सुविहितं सिंहासनं यत्कृते
प्राप्ताः कार्यमिदं विचिन्त्य करुणामस्मासु सन्दर्शय ॥ २३॥

भगवतः कृष्णस्य दृष्टिदोषपरिहाराय व्रजस्त्रियः मङ्गलानि

प्रार्थयन्ते -अन्ड्रु इव्वुलगमळन्दाय् - इति ।

लङ्काधीशदशाननादिशमन त्वद्विक्रमो वर्धतां
वत्साख्यारिविनाशिनस्तव जगन्मातुः प्रथेतां पदे ।
तं गोवर्धनपर्वतं कृतवतश्छत्रं गुणास्ते जय-
न्त्वेतं त्वां शरणं गता वयमहो लब्धुं व्रतस्योचितम् ॥ २४॥

वल्लव्यः स्वागमनकारणं कृष्णाय निवेदयन्ति - ओरुत्ति मगनाय् - इति ।

कस्याश्चिज्जठराद्भवन्निशि तदैवासीः परस्याः सुतः
तस्यैवं परनाशिनो व्यरचयत्कंसोऽप्रियं ते बहु ।
तत्सर्वं त्वयि निष्फलत्वमगमत्तस्मिन् भवत्यर्थितां
प्राप्ताः स्मः पटहादिकं बहुविधं दत्वा व्रतं कारय ॥ २५॥

गोपिकाः नन्दात्मजात् व्रतसाधनानि प्रार्थयन्ते - माले मणिवण्णा - इति ।

शङ्खान् शुक्लतमान् निनादभरितान् दीपान् बहून् सुन्दरान्
किञ्चात्यद्भुतनादवादिपटहान् वेदप्रवक्तॄन् जनान् ।
अत्युच्चध्वजमावितानमखिलं चान्यद्धरे श्रीपते
देहि त्वं वटपत्रतल्प जलदश्याम प्रभो सादरम् ॥ २६॥

गोपस्त्रियः व्रतमनुष्ठाय तज्जनितं हर्षमाविष्कुर्वन्ति - कूडारै वेल्लुम् सीर् - इति ।

हे शत्रुञ्जय गोपते प्रिय विभो स्तुत्वा वयं त्वां मुहुः
प्रप्येमान् पटहान् बहून् बहुमतिं लप्स्यामहे चोत्तमाम् ।
वस्त्राण्यङ्गदकर्णपत्रकटकान् धृत्वा ततः सङ्गताः
स्वाद्वन्नं घृतदुग्धपूरभरितं भोक्ष्यामहे च त्वया ॥ २७॥

परिसमाप्तव्रता गोपिकाः भगवति अपराधक्षमां याचन्ते - करवैकळ् पिन् चेन्ड्रु - इति ।

गोवृत्त्यैव हि जीवतामहरहः गोपालकानां कुले
येन प्रादुरभूस्त्वमेतदुचितं पुण्यं समृद्धं हि नः ।
अस्माभिः प्रिय कृष्ण गोपतनयेत्याहूयमानोऽसकृत्
मन्युं मा कुरु चास्मदिष्टमखिलं सद्यः प्रयच्छ प्रभो ॥ २८॥

एतावता ऐहिकसुखानि सम्प्रार्थ्य सम्प्रति स्वाभिलषितमामुष्मिकसुखं याचन्ते - छिट्रञ्चिरुकाले - इति ।

कृष्ण प्रातरिहागतैस्तव जनैरावेद्यमानं शृणु
प्राग्दत्तैरिह वाद्यचामरमुखैर्न स्याम तुष्टाः प्रभो ।

